# Vedantakarikavali by Shri Buchchivenkatacharya

# શ્રીબુચ્ચિવેઙ્કટાચાર્યકૃતા વેદાન્તકારિકાવલી

## Document Information

Text title : vedAntakArikA

File name : vedAntakArikA.itx

Category : major_works

Location : doc_z_misc_major_works

Author : buchchiveNkaTAchArya

Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com

Proofread by : Ankur Nagpal ankurnagpal108 at gmail.com

Description-comments : Primer on Ramanuja’s Vedantic Philosophy.

Latest update : March 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# શ્રીબુચ્ચિવેઙ્કટાચાર્યકૃતા વેદાન્તકારિકાવલી

અથ પ્રત્યક્ષનિરૂપણં નામ પ્રથમં પ્રકરણમ્ ॥

શ્રીમદ્રમાધવોપજ્ઞં નત્વાચાર્યપરમ્પરામ્ ।
કુર્વે લક્ષ્મણસિદ્ધાન્તકારિકાં કારિકાવલીમ્ ॥ ૧.૧॥

માનમેયવિભેદેન પદાર્થો દ્વિવિધો મતઃ ।
માનં પ્રત્યક્ષાનુમાનશબ્દભેદાત્રિધા ભવેત્ ॥ ૧.૨॥

પ્રમેયં દ્વિવિધં પ્રોક્તં દ્રવ્યાદ્રવ્યવિભેદતઃ ।
જડાજડત્વભિન્નેઽત્ર દ્રવ્યે તદ્દ્વિવિધં જડમ્ ॥ ૧.૩॥

પ્રકૃતિ કાલ ઇત્યાદ્યા ચતુર્વિંશતિધા મતા ।
કાલસ્તૂપાધિભેદેન ત્રિવિધઃ પરિકીર્તિતઃ ॥ ૧.૪॥

અજડં તુ પરાક્ પ્રત્યગિતિ ભેદાદ્દ્વિધા મતમ્ ।
પરાઙ્ નિત્યવિભૂતિશ્ચ ધર્મભૂતમતિસ્તથા ॥ ૧.૫॥

પ્રત્યગ્જીવેશ્વરભિદાશાલી જીવઃ પુનસ્ત્રિધા ।
બદ્ધો મુક્તો નિત્ય ઇતિ બદ્ધસ્તુ દ્વિવિધો ભવેત્ ॥ ૧.૬॥

બુભુક્ષુશ્ચ મુમુક્ષુશ્ચ બુભુક્ષુશ્ચ પુનર્દ્વિધા ।
અર્થકામપરો ધર્મપરશ્ચેતિ વિવેચનાત્ ॥ ૧.૭॥

અન્યદેવપરો વિષ્ણુપરો ધર્મપરો દ્વિધા ।
મુમુક્ષુરપિ કૈવલ્યમોક્ષયોગાદ્દ્વિધા મતઃ ॥ ૧.૮॥

ભક્તપ્રપન્નભેદેન સ તુ મોક્ષપરો દ્વિધા ।
દ્વિધા પ્રપન્ન એકાન્તિપરમૈકાન્તિભેદતઃ ॥ ૧.૯॥

દૃપ્ત આર્ત ઇતિ દ્વેધા પરમૈકાન્ત્યુદાહૃતઃ ।
ઈશ્વરઃ પઞ્ચધા ભિન્નઃ પરવ્યૂહાદિભેદતઃ ॥ ૧.૧૦॥

પર એકશ્ચતુર્ધા તુ વ્યૂહઃ સ્યાદ્વાસુદેવકઃ ।

સઙ્કર્ષણશ્ચ પ્રદ્યુમ્નોઽનિરુદ્ધ ઇતિ ભેદતઃ ॥ ૧.૧૧॥

મત્સ્યાદયસ્તુ વિભવા અનન્તાશ્ચ પ્રકીર્તિતાઃ ।
અન્તર્યામી તુ ભગવાન્ પ્રતિદેહમવસ્થિતઃ ॥ ૧.૧૨॥

અર્ચાવતારઃ શ્રીરઙ્ગવેઙ્કટાદ્યાદિષુ સ્થિતઃ ।
કેશવાદિ તુ તત્ત્વજ્ઞૈર્વ્યૂહાન્તરમુદાહૃતમ્ ॥ ૧.૧૩॥

સત્ત્વં રજસ્તમઃ શબ્દસ્પર્શરૂપરસાસ્તથા ।
ગન્ધઃ સંયોગશક્તી ચેત્યદ્રવ્યં દશધા મતમ્ ॥ ૧.૧૪॥

પ્રમાયાઃ કરણં તત્ર પ્રમાણં પરિકીર્તિતમ્ ।
યથાવસ્થિતવસ્ત્વેકવ્યવહારાનુગા પ્રમા ॥ ૧.૧૫॥

સા સંશયાન્યથાજ્ઞાનવિપરીતધિયો ન હિ ।
એકધર્મિકનાનાર્થવિષયા ધીસ્તુ સંશયઃ ॥ ૧.૧૬॥

ધીસ્તુ ધર્મવિપર્યાસેઽન્યથાજ્ઞાનમુદાહૃતમ્ ।
સૈવ ધર્મિવિપર્યાસે વિપરીતમતિર્મતા ॥ ૧.૧૭॥

સાક્ષાત્કારપ્રમાહેતુઃ પ્રત્યક્ષં માનમીરિતમ્ ।
સવિકલ્પો નિર્વિકલ્પઃ સાક્ષાત્કારો દ્વિધા ભવેત્ ॥ ૧.૧૮॥

ગ્રહઃ પ્રથમપિણ્ડસ્ય નિર્વિકલ્પક ઉચ્યતે ।
દ્વિતીયપિણ્ડગ્રહણં સવિકલ્પકધીર્ભવેત્ ॥ ૧.૧૯॥

એતદિન્દ્રિયસાપેક્ષમનપેક્ષઞ્ચ દૃશ્યતે ।
અનપેક્ષં સ્વતઃ સિદ્ધં દિવ્યં ચેતિ દ્વિધા મતમ્ ॥ ૧.૨૦॥

યોગજં તુ સ્વતઃ સિદ્ધમન્યત્સ્વામિપ્રસાદજમ્ ।
અર્વાચીનમિદં સર્વમામનન્તિ વિચક્ષણાઃ ॥ ૧.૨૧॥

નિત્યમુક્તેશ્વરજ્ઞાનમનર્વાચીનમુચ્યતે ।
સ્મૃતિ પ્રમૈવ પ્રાચીનાનુભવાજ્જાયતે હિ સા ॥ ૧.૨૨॥

સદૃશાદૃષ્ટચિન્તાદ્યૈઃ સંસ્કારોદ્બોધને સતિ ।
સ્મૃતિવત્પ્રત્યભિજ્ઞાપિ પ્રત્યક્ષેઽન્તર્ભવત્યસૌ ॥ ૧.૨૩॥

પુણ્યપૂરુષનિષ્ઠાપિ પ્રતિભાત્રૈવ સમ્મતા ।
યથાર્થં સર્વવિજ્ઞાનમિતિ યામુનભાષિતમ્ ॥ ૧.૨૪॥

ભૂતલે તુ ઘટાભાવો ભૂતલાત્મૈવ નેતરઃ ।
મૃદ્ઘટસ્ય પ્રાગભાવો ધ્વંસસ્તસ્ય કપાલકમ્ ॥ ૧.૨૫॥

સ્વાસાધારનધર્મો હિ ભેદશબ્દેન કીર્ત્યતે ।
શબ્દસ્વાભાવ્યજા ક્વાપિ પ્રતિયોગિત્વધીઃ કૃતા ॥ ૧.૨૬॥

અન્તઃકરણચૈતન્યં તદ્વૃત્ત્યા વિષયેણ ચ ।
ચૈતન્યં સમતાપન્નં સાક્ષાત્કારમજીજનત્ ॥ ૧.૨૭॥

ઇત્યાદિવચનં સર્વં પરોક્તં નાત્ર સમ્મતમ્ ।
સામાન્યં સમવાયશ્ચ વિશેષો નાત્ર સમ્મતઃ ॥ ૧.૨૮॥

સઙ્ખ્યાદિગુણવર્ગસ્ય ગુણપાર્થક્યકલ્પનમ્ ।
સૂત્રકારવિરુદ્ધં યત્તત્સર્વં પરિહાસ્યતે ॥ ૧.૨૯॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં પ્રત્યક્ષનિરૂપણં નામ પ્રથમં પ્રકરણમ્ ॥

---

અથાનુમાનનિરૂપણં નામ દ્વિતીયં પ્રકરણમ્ ।

અનુમિત્યાત્મવિજ્ઞાનેऽનુમાનં કરણં સ્મૃતમ્ ।
તચ્ચ લિઙ્ગપરામર્શસ્તદ્ધેતુર્વ્યાપ્તિધીર્મતા ॥ ૨.૧॥

સાધ્યાભાવાધિકરણાવૃત્તિત્વં વ્યાપ્તિરુચ્યતે ।
વ્યાપ્યાસ્ય પક્ષવૃત્તિત્વધીઃ પરામર્શનામભાક્ ॥ ૨.૨॥

તજ્જા પક્ષે સાધ્યમતિરનુમિત્યાત્મિકા મતા ।
ભૂયિષ્ઠસાહચર્યૈકજ્ઞાનેન વ્યાપ્તિધીર્ભવેત ॥ ૨.૩॥

તત્સપક્ષે સપક્ષસ્તુ પૂર્વં નિશ્ચિતસાધ્યકઃ ।
સન્દિગ્ધસાધ્યકઃ પક્ષો વિપક્ષસ્તદભાવવાન્ ॥ ૨.૪॥

અન્વયી વ્યતિરેકી ચ કિઞ્ચ હેતુર્દ્વિલક્ષણઃ ।
વ્યભિચારી વિરુદ્ધશ્ચાસિદ્ધઃ સત્પ્રતિપક્ષકઃ ॥ ૨.૫॥

બાધિતશ્ચેતિ પઞ્ચૈતે હેત્વાભાસા ન સાધકાઃ ।
એવં સ્વાર્થાનુમાનસ્ય પ્રપઞ્ચસ્તુ નિરૂપિતઃ ॥ ૨.૬॥

ન્યાયજન્યઃ પરામર્શઃ પરાર્થાનુમિતેઃ કૃતે ।
ન્યાયોऽવયવવાક્યાનિ પ્રતિજ્ઞાદીનિ પઞ્ચ ચ ॥ ૨.૭॥

પ્રતિજ્ઞા સાધ્યનિર્દેશો હેતુસ્તદ્ધ્વચનં મતમ્ ।
વ્યાપ્ત્યુક્તિપૂર્વદૃષ્ટાન્તવાગુદાહરણં ભવેત્ ॥ ૨.૮॥

વ્યાપ્યસ્ય પક્ષવૃત્તિત્વબોધશ્ચોપનયો મતઃ ।
ઉપસંહારવચનં ભવેન્નિગમનં પુનઃ ॥ ૨.૯॥

॥ ઇતિ વેદાન્તકારિકાવલ્યામનુમાનનિરૂપણં નામ દ્વિતીયં પ્રકરણમ્ ॥

---

અથ શબ્દનિરૂપણં નામ તૃતીયં પ્રકરણમ્ ।

અનાપ્તાનુક્તવાક્યં યત્તચ્છાબ્દકરણં સ્મૃતમ્ ।
વેદસ્યાપૌરુષેયત્વાત્તત્ર લક્ષણસઙ્ગતિઃ ॥ ૩.૧॥

સિદ્ધે વ્યુત્પત્તિસદ્ભાવાદ્વેદો નિષ્પન્નબોધકઃ ।
તત્કાર્યપરતાહાનેરપ્રામાણ્યં ન શઙ્ક્યતામ્ ॥ ૩.૨॥

કર્મબ્રહ્માભિધાયિત્વાત્સ ચ ભાગદ્વયાત્મકઃ ।
પૂર્વભાગઃ કર્મપર ઉત્તરો બ્રહ્મગોચરઃ ॥ ૩.૩॥

તદૈક્યાત્પૂર્વપરયોર્વ્યાખ્યેયા હ્યેકશાસ્ત્રતા ।
અધ્યાયભેદવદ્ભેદે શાસ્ત્રૈક્યં ન વિરુધ્યતે ॥ ૩.૪॥

વિધ્યર્થવાદમન્ત્રાત્મા ત્રિવિધઃ સ પ્રતીયતે ।
અનુષ્ઠેયાર્થગમકો મન્ત્રઃ સ્યાદર્થવાદગીઃ ॥ ૩.૫॥

પ્રવૃત્ત્યુત્તમ્ભિકા યા સ્યાદ્વિધિર્વાક્યં પ્રવર્તકમ્ ।
સ ત્રિધાપૂર્વનિયમપરિસઙ્ખ્યાવિભેદતઃ ॥ ૩.૬॥

નિત્યા નૈમિત્તિકાઃ કામ્યા ઇતિ તે બહુધા મતાઃ ।
તેષાં સ્વરૂપલક્ષ્માણિ મન્તવ્યાનિ નયાન્તરે ॥ ૩.૭॥

છન્દઃ કલ્પશ્ચ શિક્ષા ચ નિરુક્તં જ્યૌતિષં તથા ।
વ્યાકૃતિશ્ચેતિ વેદસ્ય ષડઙ્ગાનિ પ્રચક્ષતે ॥ ૩.૮॥

અનુષ્ટુબાદિકં છન્દઃ કલ્પઃ શ્રૌતાદિબોધકઃ ।
વર્ણનિર્ણાયિકા શિક્ષા નિરુક્તં સ્વાર્થબોધકમ્ ॥ ૩.૯॥

અનુષ્ઠાનાદિકાલસ્ય નિર્ણયે જ્યૌતિષં ભવેત્ ।
સૌશબ્ધાય વ્યાકરણમિતિ સાઙ્ગે પ્રમાણતા ॥ ૩.૧૦॥

એતન્મૂલતયા સ્મૃત્યાદીનાં પ્રામાણ્યમીરિતમ્ ।
એતદ્વિરુદ્ધં યત્કિઞ્ચિન્નાશ્નુવીત પ્રમાણતામ્ ॥ ૩.૧૧॥

આકાઙ્ક્ષાદિકમેતચ્ચ શાબ્દબોધૈકકારણમ્ ।
તદ્વિચારોઽત્ર સઙ્ક્ષિપ્તો ગ્રન્થવિસ્તરભીરુણા ॥ ૩.૧૨॥

મુખ્યૌપચારિકત્વાભ્યાં સ શબ્દો દ્વિવિધો મતઃ ।
અભિધા મુખ્યવૃત્તિઃ સ્યાદ્વૃત્તિરન્યૌપચારિકી ॥ ૩.૧૩॥

શરીરવાચકાઃ શબ્દાઃ શરીરિકૃતવૃત્તયઃ ।
સર્વશબ્દૈકવાચ્યત્વં હરેરિતિ ગદિષ્યતે ॥ ૩.૧૪॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં શબ્દનિરૂપણં નામ તૃતીયં પ્રકરણમ્ ॥

(પ્રમાણનિરૂપણં સમાપ્તમ્)

---

અથ પ્રકૃતિનિરૂપણં નામ ચતુર્થં પ્રકરણમ્ ।

યત્પ્રમાવિષયં તત્સ્યાત્પ્રમેયમિતિ તદ્દ્વિધા ।
દ્રવ્યમદ્રવ્યમિત્યાદ્યં તદુપાદાનકારણમ્ ॥ ૪.૧॥

અવસ્થાન્તરયોગિત્વમુપાદાનત્વમુચ્યતે ।
ગુણાશ્રયં વા દ્રવ્યં સ્યાત્તચ્ચ દ્વેધા પ્રકીર્તિતમ્ ॥ ૪.૨॥

અમિશ્રસત્ત્વરાહિત્યં જડત્વમનુગદ્યતે ।
જડં પ્રકૃતિકાલૌ દ્વૌ સા સત્ત્વાદિગુણત્રયા ॥ ૪.૩॥

પ્રકૃતિઃ સા ક્ષરાવિદ્યામાયાશબ્દૈર્નિગદ્યતે ।
કાર્યોન્મુખત્વાવસ્થા સ્યાદવ્યક્તવ્યપદેશનાત્ ॥ ૪.૪॥

અવ્યક્તાન્મહદુત્પત્તિઃ સાત્ત્વિકત્વાદિભેદતઃ ।
અહઙ્કારસ્તતસ્ત્રેધા સાત્ત્વિકત્વાદિભેદભાક્ ॥ ૪.૫॥

વૈકારિકસ્તૈજસશ્ચ ભૂતાદિરિતિ ભેદતઃ ।
નામાન્તરાણિ સન્ત્વેવમહઙ્કારાત્મના સતામ્ ॥ ૪.૬॥

તેષુ વૈકારિકાત્સાત્ત્વિકાહઙ્કારાદુપસ્કૃતાત્ ।
એકાદશેન્દ્રિયાણિ સ્યુર્જ્ઞાનકર્મેન્દ્રિયાત્મના ॥ ૪.૭॥

જ્ઞાનપ્રસરણે શક્તં જ્ઞાનેન્દ્રિયમુદાહૃતમ્ ।

તન્મનઃશ્રોત્રચક્ષુસ્ત્વગ્ઘ્રાણજિહ્વાત્મના મતમ્ ॥ ૪.૮॥

મનઃ સ્મૃત્યાદિહેતુસ્તદ્બન્ધમોક્ષાદિકારણમ્ ।
શબ્દમાત્રગ્રહે શક્તમિન્દ્રિયં શ્રોત્રમુચ્યતે ॥ ૪.૯॥

રૂપમાત્રગ્રાહિ ચક્ષુસ્ત્વક્ સ્પર્શગ્રહકારણમ્ ।
ગન્ધૈકગ્રાહકં ઘ્રાણં રસનં રસભાસકમ્ ॥ ૪.૧૦॥

એષાં વિષયસમ્બન્ધઃ સંયોગાદિઃ પ્રકીર્તિતઃ ।
ઉચ્ચારણાદિકર્મૈકશક્તં કર્મેન્દ્રિયં મતમ્ ॥ ૪.૧૧॥

પઞ્ચધા વાક્પાણિપાદપાયૂપસ્થપ્રભેદતઃ ।
વર્ણોચ્ચારણહેતુર્વાક્ પાણિઃ શિલ્પાદિકારણમ્ ॥ ૪.૧૨॥

સઞ્ચારકારણં પાદઃ પાયુર્મલનિવૃત્તિકૃત્ ।
ઉપસ્થઃ પરમાનન્દહેતુઃ સ્ત્રીપુંસયોર્મતઃ ॥ ૪.૧૩॥

રાજસાહઙ્ક્રિયાયુક્તતામસાહઙ્કૃતેઃ પુનઃ ।
જાયતે શબ્દતન્માત્રાદિકં ભૂતાદિકારણમ્ ॥ ૪.૧૪॥

ભૂતાનામેવ સૂક્ષ્મૈકપૂર્વાવસ્થાવિશેષવત્ ।
દ્રવ્યં તન્માત્રમિત્યાહુઃ પઞ્ચધા ભૂતપઞ્ચભિઃ ॥ ૪.૧૫॥

તન્માત્રપઞ્ચકં શબ્દાદ્યાશ્રયત્વેન સમ્મતમ્ ।
ભૂતાનાં સ્યાદુપાદાનં શબ્દતન્માત્રમાદિમમ્ ॥ ૪.૧૬॥

સ્પર્શતન્માત્રકં રૂપરસતન્માત્રકે અપિ ।
ગન્ધતન્માત્રમેતેભ્યઓ ખાનિલજ્યોતિરબ્ભુવઃ ॥ ૪.૧૭॥

પઞ્ચભૂતાનિ તન્માત્રસ્વરૂપં તુ નિરૂપ્યતે ।
તામસાહઙ્કૃતિખયોર્મધ્યાવસ્થાયુગાદિમમ્ ॥ ૪.૧૮॥

શબ્દતન્માત્રમસ્માચ્ચ વિયદુત્પદ્યતે તથા ।
ખમેવ સૂર્યસ્પન્દેન દિગિતિ વ્યપદિશ્યતે ॥ ૪.૧૯॥

દ્રવ્યં તદાકાશવાય્વોર્મધ્યાવસ્થાસુસંયુતમ્ ।
સ્પર્શતન્માત્રમસ્માચ્ચ વાયુરુત્પદ્યતે ક્રમાત્ ॥ ૪.૨૦॥

મધ્યાવસ્થાયુતં વાયુતેજસોર્દ્રવ્યમુચ્યતે ।
રૂપતન્માત્રમિત્યસ્માત્તેજ ઉત્પદ્યતે ક્રમાત્ ॥ ૪.૨૧॥

મધ્યાવસ્થાયુતં તેજઃપયસોર્દ્રવ્યમુચ્યતે ।
રસતન્માત્રમિત્યસ્માત્સલિલં ખલુ જાયતે ॥ ૪.૨૨॥

મધ્યાવસ્થાયુતં વારિપૃથિવ્યોર્દ્રવ્યમુચ્યતે ।
ગન્ધતન્માત્રમિત્યસ્માત્પૃથિવી સમુદેત્યસૌ ॥ ૪.૨૩॥

આદ્યં શબ્દવદન્યચ્ચ શબ્દસ્પર્શવદુચ્યતે ।
રૂપશબ્દસ્પર્શવત્સ્યાત્તૃતીયઞ્ચ તુરીયકમ્ ॥ ૪.૨૪॥

રૂપશબ્દસ્પર્શરસયુક્તં ગન્ધાધિકં પરમ્ ।
તન્માત્રપઞ્ચકં ભૂતપઞ્ચકઞ્ચૈવમીરિતમ્ ॥ ૪.૨૫॥

એવં પ્રકૃતિરવ્યક્તમહદાદિક્રમાદ્ભિદામ્ ।
ચતુર્વિંશાસઙ્ખ્યાનાં પ્રાપિતા સુનિરૂપિતા ॥ ૪.૨૬॥

ભૂતાનિ ભગવાન્ સૃષ્ટ્વા દ્વેધૈકૈકં વિભક્તવાન્ ।
એકમેકં વિધાયાંશઞ્ચતુર્ધાન્યં વિભક્તવાન્ ॥ ૪.૨૭॥

ચતુર્ધા રચિતાનંશાંસ્તત્તદંશે યુનક્તિ સઃ ।
ચતુર્થાંશયુતસ્વાંશૈઃ પઞ્ચભૂતાન્યજીજનત્ ॥ ૪.૨૮॥

અન્યભૂતાંશસત્ત્વેઽપિ સ્વાંશભૂયસ્ત્વતઃ કૃતઃ ।
પૃથ્વ્યમ્બેજોઽનિલવ્યોમવ્યપદેશો જગત્યભૂત્ ॥ ૪.૨૯॥

પઞ્ચીકરણમેતાદૃગુપલક્ષયતિ શ્રુતિઃ ।
ભૂતૈર્મહદહઙ્કૃત્યોઃ સપ્તીકૃતિરુપસ્કૃતા ॥ ૪.૩૦॥

ભૂતપઞ્ચકમવ્યક્તમેતે મહદહઙ્કૃતી ।
ઉપાદાનાનિ દેહસ્યેન્દ્રિયાણિ પ્રતિપૂરુષમ્ ॥ ૪.૩૧॥

ભિન્નાન્યાકલ્પકલ્પાનિ શરીરં ભૂષયન્તિ હિ ।
ચેતનૈકનિયામ્યં યચ્છરીરં તન્નિગદ્યતે ॥ ૪.૩૨॥

શરીરં દ્વિવિધં નિત્યમનિત્યમિતિ ભેદતઃ ।
ભગવન્નિત્યસૂરીણાં નિત્યં નૈસર્ગિકં તુ તત્ ॥ ૪.૩૩॥

અનિત્યમપિ તદ્દ્વેધા કર્માકર્મકૃતત્વતઃ ।
અકર્મકૃતમીશાદેરિચ્છયા પરિકલ્પિતમ્ ॥ ૪.૩૪॥

તચ્ચ કર્મકૃતં દ્વેધા સ્વેચ્છાસહકૃતં તથા ।
કર્મમાત્રકૃતઞ્ચેતિ સૌભર્યાદિર્યથાદિમમ્ ॥ ૪.૩૫॥

દ્વિતીયમસ્મદાદીનાં સામાન્યેન પુનર્દ્વિધા ।
સ્થાવરં જઙ્ગમઞ્ચેતિ શિલાદિ સ્થાવરં મતમ્ ॥ ૪.૩૬॥

જઙ્ગમઞ્ચ દ્વિધા પ્રોક્તં સ્યાદ્યોનિજમયોનિજમ્ ।
યોનિજં દેવમાનુષ્યતિર્યગાદિવિભાગવત્ ॥ ૪.૩૭॥

ઉદ્ભિજ્જસ્વેદજાણ્ડોત્થનારક્યાખ્યમયોનિજમ્ ।
એવં પઞ્ચીકૃતાનાં સ્યાદણ્ડોત્પાદકતા સ્મૃતા ॥ ૪.૩૮॥

અણ્ડોત્પત્તેઃ પૂર્વસૃષ્ટિઃ સમષ્ટિરત ઉત્તરા ।
વ્યષ્ટિસૃષ્ટિરિતિ દ્વેધા સૃષ્ટિર્વેદાન્તિસમ્મતા ॥ ૪.૩૯॥

અવ્યક્તાદેર્મહત્ત્વાદિરવસ્થાન્તરમિષ્યતે ।
વિજાતીયાન્તરાવસ્થા ચેત્તત્ત્વાન્તરમીર્યતે ॥ ૪.૪૦॥

ઇત્થમવ્યક્તમહદહઙ્કારેન્દ્રિયનામકૈઃ ।
તન્માત્રાણીતિ તત્ત્વાનિ ચતુર્વિંશતિધાભવન્ ॥ ૪.૪૧॥

ભોગ્યભોગોપકરણભોગસ્થાનાનિ ચેશિતુઃ ।
જીવસ્ય ચ પ્રકૃત્યાદીન્યુદ્ભવન્તિ યથાયથમ્ ॥ ૪.૪૨॥

વિષયો ભોગ્યમક્ષ્યાદિ ભોગોપકરણં મતમ્ ।
ભોગસ્થાનં તુ ભુવનં તદ્વર્તીન્યણ્ડજાનિ હિ ॥ ૪.૪૩॥

એવં પઞ્ચીકૃતૈર્ભૂતૈરારબ્ધં પ્રાકૃતં ભવેત્ ।
કપિત્થફલકાકારમણ્ડં નામ નિગદ્યતે ॥ ૪.૪૪॥

જમ્બૂદ્વીપમિદં સર્વં લવણોદધિનાવૃતમ્ ।
પ્લક્ષદ્વીપં તતોઽપીક્ષુસમુદ્રેણ પ્રવેષ્ટિતમ્ ॥ ૪.૪૫॥

તતસ્તુ શાલ્મલિદ્વીપં સુરાસાગરવેષ્ટિતમ્ ।
કુશદ્વીપં તતઃ સર્પિઃ સમુદ્રેણ પ્રવેષ્ટિતમ્ ॥ ૪.૪૬॥

ક્રૌઞ્ચદ્વીપં તતઃ પશ્ચાદ્દધ્યર્ણવસમાવૃતમ્ ।
શાકદ્વીપં તતઃ ક્ષીરસમુદ્રેણ પ્રવેષ્ટિતમ્ ॥ ૪.૪૭॥

પુષ્કરદ્વીપમભિતઃ શુદ્ધામ્બુધિસમાવૃતમ્ ।
સર્વમેતદ્ધૈમભૂમ્યા તતો વલયપર્વતઃ ॥ ૪.૪૮॥

અન્ધકારાવૃતઃ સોઽપિ સોઽપિ ગર્ભોદકેન ચ ।

તતોઽણ્ડમેકમેવં સ્યાદ્ભૂમેરૂર્ધ્વમધોઽપિ ચ ॥ ૪.૪૯॥

અણ્ડાન્યેતાદૃશાનિ સ્યુરનન્તાનિ મહાહરેઃ ।
જલબુદ્બુદકલ્પાનિ પુરાણોક્તાન્યનુક્રમાત્ ॥ ૪.૫૦॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં પ્રકૃતિનિરૂપણં નામ ચતુર્થં પ્રકરણમ્ ॥

---

અથ કાલનિરૂપણં નામ પઞ્ચમં પ્રકરણમ્ ।

ગુણત્રયવિહીનો યઃ સ જડઃ કાલ ઉચ્યતે ।
અખણ્ડખણ્ડભેદેન સ કાલો દ્વિવિધો મતઃ ॥ ૫.૧॥

આદ્યો વિભુર્ભૂતભાવિવર્તમાનત્વધીકરઃ ।
નિમેષાદિપ્રભેદેન બહુભેદસ્ત્વસૌ મતઃ ॥ ૫.૨॥

અખણ્ડકાલ એવાયં નિત્ય ઇત્યવગમ્યતે ।
કાલઃ સ્વકાર્યં પ્રતિ તુ સ્યાદુપાદાનકારણમ્ ॥ ૫.૩॥

કાર્યરૂપસ્તતો નૈવ નિત્ય ઇત્યવધાર્યતામ્ ।
લીલાવિભૂતાવીશાનઃ કાલમાલમ્બ્ય કાર્યકૃત્ ॥ ૫.૪॥

એષ નિત્યવિભૂતૌ તુ ન કાલમવલમ્બતે ।
ક્રીડાપરિકરઃ સોઽયં કાલસ્તુ પરમાત્મનઃ ॥ ૫.૫॥

નિત્યનૈમિત્તિકપ્રાકૃતલયાઃ કાલહેતુકાઃ ।
એવં પ્રકાશિતં કાલસ્વરૂપસ્ય નિરૂપણમ્ ॥ ૫.૬॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં કાલનિરૂપણં નામ પઞ્ચમં પ્રકરણમ્ ॥

---

અથ નિત્યવિભૂતિનિરૂપણં નામ ષષ્ઠં પ્રકરણમ્ ।

શુદ્ધસત્ત્વે ધર્મભૂતજ્ઞાનજીવેશ્વરેષુ ચ ।
અજડત્વં ભવેલ્લક્ષ્મ તત્પુનઃ સ્વપ્રકશતા ॥ ૬.૧॥

પરાક્ત્વે સત્યજડતા લક્ષ્મ પ્રથમયોર્મતમ્ ।
પરસ્મૈ ભાસમાનત્વં પરાક્ત્વમનુગદ્યતે ॥ ૬.૨॥

સત્ત્વૈકમૂર્તિકો દેશઃ શુદ્ધસત્ત્વમચેતનમ્
પરિચ્છિન્નમધો દેશેઽનન્તમૂર્ધ્વપ્રદેશતઃ ॥ ૬.૩॥

સ્વયમ્પ્રકાશરૂપેયં પઞ્ચોપનિષદાત્મિકા ।
વિષ્ણોર્નિત્યવિભૂતિઃ સ્યાન્નિત્યમાનન્દરૂપિણી ॥ ૬.૪॥

સેયં વિભૂતિરીશસ્ય નિત્યમુક્તાત્મનામપિ ।
ભોગ્યભોગોપકરણભોગસ્થાનમયી મતા ॥ ૬.૫॥

ભોગ્યમીશ્વરદેહાદિ દ્વિતીયં ચન્દનાદિકમ્ ।
ભોગસ્થાનં તુ માણિક્યગોપુરાદિકમુચ્યતે ॥ ૬.૬॥

દેહા ઈશ્વરનિત્યાનાં નિત્યેચ્છાકલ્પિતા હરેઃ ।
મુક્તાનાં તુ શરીરાદિસ્તત્સઙ્કલ્પકૃતો મતઃ ॥ ૬.૭॥

શ્રીપતેર્વ્યૂહવિભવાર્ચાવતારતયા સતઃ ।
અપ્રાકૃતશરીરાણિ પ્રતિષ્ઠાનન્તરં હરેઃ ॥ ૬.૮॥

પ્રસાદોન્મુખતાપત્તૌ પ્રકટાનિ ભવન્તિ હિ ।
તચ્ચ પ્રકટનં તસ્ય સઙ્કુલ્પાધીનમીર્યતે ॥ ૬.૯॥

પ્રાકૃતાપ્રાકૃતતનુસંસર્ગઃ કથમિત્યલમ્ ।
રામકૃષ્ણાવતારાદૌ દૃષ્ટત્વાત્તસ્ય ભૂયસા ॥ ૬.૧૦॥

ઔજ્જ્વલ્યાદિગુણે યે તુ દિવ્યમઙ્ગલવિગ્રહે ।
હરેસ્તાંસ્તુ વિજાનીહિ ગદ્યત્રયવિચારતઃ ॥ ૬.૧૧॥

મુક્તાનામશરીરત્વવચનં યત્તુ દૃશ્યતે ।
તત્કર્મકૃતશારીરસમ્બન્ધાભાવગોચરમ્ ॥ ૬.૧૨॥

નિરૂપયન્તિ શ્રીનાથદિવ્યમઙ્ગલવિગ્રહમ્ ।
પુરાણોક્તક્રમાદસ્માદાદ્યવેદાન્તદેશિકાઃ ॥ ૬.૧૩॥

ત્રિપાદ્વિભૂતિવૈકુણ્ઠપરવ્યોમાદિશબ્દિતા ।
વિભૂતિરિયમીશસ્ય મહતી સુમહીયતે ॥ ૬.૧૪॥

દ્વાદશાવરણોપેતમનેકશતગોપુરમ્ ।
વૈકુણ્ઠં નામ નગરમેતસ્યાં પ્રવિજૃમ્ભતે ॥ ૬.૧૫॥

આનન્દનામકસ્તત્ર સુદિવ્યનિલયઃ સ્ફુટઃ ।
તત્ર રત્નમયસ્તમ્ભસહસ્રા ભાસતે સભા ॥ ૬.૧૬॥

અનન્તસ્તત્ર ચ ફણામણિતેજોવિરાજિતઃ ।
તસ્મિન્ ધર્માદિસહિતસિંહાસનમુપસ્થિતમ્ ॥ ૬.૧૭॥

તત્ર ચામરવદ્ધસ્તૈર્વિમલાદિભિરર્ચિતમ્ ।
પદ્મમષ્ટદલં ભાતિ તત્ર શેષોઽસ્તિ ધીમયઃ ॥ ૬.૧૮॥

તત્રાનન્દમયઃ સાક્ષાત્સર્વવાચામગોચરઃ ।
અદ્ભુતજ્યોતિરાકારો ભાતિ નારાયણાત્મના ॥ ૬.૧૯॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં નિત્યવિભૂતિનિરૂપણં નામ ષષ્ઠં પ્રકરણમ્ ॥

---

અથ ધર્મભૂતજ્ઞાનનિરૂપણં નામ સપ્તમં પ્રકરણમ્ ।

ધર્મો ભવતિ યજ્જ્ઞાનં પ્રભા દીપે યથાત્મનોઃ ।
તદ્ધર્મભૂતવિજ્ઞાનં નિત્યં નિત્યેશ્વરેષુ તત્ ॥ ૭.૧॥

બદ્ધેષુ તત્તિરોભૂતં મુક્તેષુ પ્રાક્તિરોહિતમ્ ।
સઙ્કોચનવિકાસાભ્યાં નાશોત્પત્તિવિપાકભાક્ ॥ ૭.૨॥

સઙ્કોચ ઇન્દ્રિયદ્વારા જ્ઞાનં સઙ્કોચ્યતે યદિ ।
વિકાસ ઇન્દ્રિયદ્વારા જ્ઞાનપ્રસરણાદ્ભવેત્ ॥ ૭.૩॥

સ્વપ્રકાશં સ્વતો માનમેતદિત્યત્ર સમ્મતમ્ ।
સ્વાન્યનિર્વાહકત્વેન દીપવત્સ્વપ્રકાશતા ॥ ૭.૪॥

તમોવિશેષસાન્નિધ્યાજ્જ્ઞાનં સ્વાપે તિરોહિતમ્ ।
દ્રવ્યત્વમસ્ય જ્ઞાનસ્ય પ્રભાવદ્ગુણતાપિ ચ ॥ ૭.૫॥

ધીભેદાઃ સુખદુઃખેચ્છાદ્વેષયત્ના ન તે પૃથક્ ।
દ્વેક્ષ્મીચ્છામીતિ વાદસ્તુ સ્મરામીત્યાદિવન્મતઃ ॥ ૭.૬॥

સ્મૃત્યાદયો જ્ઞાનભેદા અનન્તા જીવવૃત્તયઃ ।
જ્ઞાનશક્ત્યોર્વિતતયોઽનન્તાશ્ચ ભગવદ્ગુણાઃ ॥ ૭.૭॥

ગદ્યત્રયે મહાચાર્યૈરયમર્થ ઉદીરિતઃ ।
તત્તત્સ્વરૂપવિજ્ઞાનં તદ્ભાષ્યેણાવગમ્યતે ॥ ૭.૮॥

ભક્તિપ્રપત્તિસુપ્રીત ઈશ્વરો મુક્તિદાયકઃ ।
અતો ભક્તિપ્રપત્તી હિ મુક્તૌ પરમકારણમ્ ॥ ૭.૯॥

કર્મયોગજ્ઞાનયોગૌ ભક્તિસાધનમૂચિરે ।
ફલાભિસન્ધિરહિતં કર્મારાધનમીશિતુઃ ॥ ૭.૧૦॥

વિનિર્મલાન્તઃકરણે ચિન્તનં જ્ઞાનયોગકઃ ।
સાક્ષાદિતરથા વાપિ ભક્તૌ કારણતાનયોઃ ॥ ૭.૧૧॥

ભક્તિયોગોઽમષ્ટાઙ્ગોઽવિચ્છિન્ના સ્મૃતિસન્તતિઃ ।
વિવેકાદિભિરુત્પાદ્યા દર્શનાકારતાં ગતા ॥ ૭.૧૨॥

તત્તચ્છરીરાવસાનસમયે પરિણામિની ।
સેયં સાધનભક્તિઃ સ્યાત્પ્રપત્ત્યઙ્ગવતી મતા ॥ ૭.૧૩॥

ફલભક્તિસ્તુ ભગવદનુગ્રહકૃતા ભવેત્ ।
અત એવ હરિઃ સાક્ષાત્સિદ્ધોપાયત્વમશ્નુતે ॥ ૭.૧૪॥

અન્તરાદિત્યવિદ્યાદિભેદાત્સા બહુધા મતા ।
સર્વાપિ બ્રહ્મવિદ્યેયં બ્રહ્મપ્રાપ્ત્યુપયોગિની ॥ ૭.૧૫॥

ન્યાસવિદ્યા પ્રપત્તિઃ સ્યાદઙ્ગપઞ્ચયોગિની ।
આનુકૂલ્યસ્ય સઙ્કલ્પઃ પ્રાતિકૂલ્યસ્ય વર્જનમ્ ॥ ૭.૧૬॥

રક્ષિષ્યતીતિ વિશ્વાસો ગોપ્તૃત્વવરણં તથા ।
આત્મનિક્ષેપકાર્પણ્યે અઙ્ગપઞ્ચકમીરિતમ્ ॥ ૭.૧૭॥

ગુરૂપસદનાદેષા વિજ્ઞાતવ્યા મનીષિભિઃ ।
ઇયમુત્તરપૂર્વાઘાશ્લેષનાશકૃદુચ્યતે ॥ ૭.૧૮॥

અપચારાન્વિના બ્રહ્મવિદાં નાસ્યા વિરોધકૃત્ ।
અન્યોઽસ્તીતિ મહાચાર્યશાસનં વ્યવસીયતે ॥ ૭.૧૯॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં ધર્મભૂતજ્ઞાનનિરૂપણં નામ સપ્તમં પ્રકરણમ્ ॥

---

અથ જીવનિરૂપણં નામાષ્ટમં પ્રકરણમ્ ।

અણુત્વે સતિ ચૈતન્યં જીવલક્ષણમુચ્યતે ।
સ ચ દેહેન્દ્રિયાદિભ્યો વિલક્ષણતયા મતઃ ॥ ૮.૧॥

જીવસ્યાનેકવિષયાનુભવોઽણોરપિ સ્ફુટઃ ।
યદ્ધર્મભૂતવિજ્ઞાનવ્યાપ્તિસ્તત્રોપયોગિની ॥ ૮.૨॥

પૂર્વાનુભૂતવિષયપ્રતિસન્ધાનયોગતઃ ।
નિત્યઃ પ્રતિશરીરં સ ભિન્નો ભોક્ત્રાદિશબ્દતઃ ॥ ૮.૩॥

પ્રકૃત્યપેક્ષયા દેહી દેહઃ શ્રીમદપેક્ષયા ।
તસ્ય સ્વયપ્રકાશત્વં પ્રત્યક્ષશ્રુતિબોધિતમ્ ॥ ૮.૪॥

દેશાન્તરફલાદીનામુપલબ્ધિરણોરપિ ।
કર્મજન્યાદદૃષ્ટાખ્યવિજ્ઞાનાદિતિ સઞ્જગુઃ ॥ ૮.૫॥

બદ્ધો મુક્તો નિત્ય ઇતિ જીવઃ સ ત્રિવિધો મતઃ ।
બ્રહ્માદિકીટપર્યન્તા બદ્ધાઃ સંસારયોગિનઃ ॥ ૮.૬॥

ત્રૈવર્ગિકાર્થનિષ્ણાતા બુભુક્ષવ ઉદાહૃતાઃ ।
અર્થકામપરાસ્તત્ર સ્વદેહાત્માભિમાનિનઃ ॥ ૮.૭॥

તે તુ ધર્મપરાસ્તત્ર યાગાદ્યર્થાનુષઙ્ગિણઃ ।
ધર્મસ્ત્વલૌકિકશ્રેયઃસાધનં ચોદનોદિતમ્ ॥ ૮.૮॥

રુદ્રાદ્યારાધનપરા અન્યદેવપરા મતાઃ ।
આર્તો જિજ્ઞાસુરર્થાર્થીત્યેવં ભાગવતાઃ સ્મૃતાઃ ॥ ૮.૯॥

મુમુક્ષૂણાં ચ કૈવલ્યપરાણાં લક્ષ્મ કથ્યતે ।
પ્રકૃતેસ્તુ વિયુક્તસ્ય સ્વાત્મનોઽનુભવઃ પરમ્ ॥ ૮.૧૦॥

કૈવલ્યમર્ચિર્માર્ગેણ ગત્વાપિ પરમં પદમ્ ।
રમણત્યક્તપત્નીવત્ ક્વચિત્કોણેઽવતિષ્ઠતે ॥ ૮.૧૧॥

કૈવલ્યમેતત્કેષાઞ્ચિદાર્યાણામેવ સમ્મતમ્ ।
અસ્મદાર્યાસ્તુ કૈવલ્યં ન મન્યન્ત ઇતિ સ્થિતમ્ ॥ ૮.૧૨॥

ભક્તાઃ પૂર્વોક્તભક્ત્યૈવ મુક્તિસમ્પ્રાપ્ત્યપેક્ષિણઃ ।
અપશૂદ્રનયે ભક્તૌ શૂદ્રાનધિકૃતિઃ સ્ફુટા ॥ ૮.૧૩॥

સાધ્યસાધનભક્તિભ્યાં ભક્તાઃ સ્યુર્દ્વિવિધા મતાઃ ।
પરાઙ્કુશાદિકાનાદ્યાન્ વ્યાસાદીનપરાન્ વિદુઃ ॥ ૮.૧૪॥

મુમુક્ષવઃ પ્રપન્નાશ્ચાકિઞ્ચન્યાદિકયોગિનઃ ।
ત્રૈવર્ગિકપરા મોક્ષપરાશ્ચેતિ ચ તે દ્વિધા ॥ ૮.૧૫॥

ધર્માર્થકામાન્ સ્વામ્યર્થં યેઽન્વતિષ્ઠંસ્ત આદિમાઃ ।
સત્સઙ્ગાદર્થવૈરાગ્યે મુમુક્ષાયાં કૃતાદરાઃ ॥ ૮.૧૬॥

ભગવદ્ભોગસમ્પ્રાપ્ત્યૈ મહાચાર્યં સમાશ્રિતાઃ ।

અસામર્થ્યેન ભક્ત્યાદૌ પ્રપત્ત્યેકાશ્રયાઃ પરે ॥ ૮.૧૭॥

સર્વાધિકારિતાં ધીરાઃ પ્રપત્તેરાચચક્ષિરે ।
એકાન્તિનઃ ફલં મુક્ત્યા સહાન્યદ્ય ઉશન્તિ તે ॥ ૮.૧૮॥

પરમૈકાન્તિનસ્ત્વૈચ્છન્ ભગવત્પ્રીતિમેવ યે ।
પ્રારબ્ધં કર્મ ભુક્ત્વૈવ યો મોક્ષમભિકાઙ્ક્ષતિ ॥ ૮.૧૯॥

દૃપ્ત આર્તસ્ત્ય સંસારે વહ્નાવિવ સમુત્તપન્ ।
પ્રપત્ત્યનન્તરે કાલે યો મોક્ષમભિકાઙ્ક્ષતિ ॥ ૮.૨૦॥

સત્સઙ્ગાદિતિ સુશ્લોકદ્વયોક્તગતિમાન્નરઃ ।
આવિર્ભૂતસ્વસ્વરૂપો મુક્તો બ્રહ્માનુભૂતિભાક્ ॥ ૮.૨૧॥

મુક્તસ્ય ભોગમાત્રે તુ સામ્યં શ્રુતિષુ ચોદિતમ્ ।
સ્વેચ્છયા સર્વલોકેષુ સઞ્ચારોઽસ્ય ન રુધ્યતે ॥ ૮.૨૨॥

સ્વેચ્છા ચ હરિસઙ્કલ્પાયત્તા મુક્તસ્ય લભ્યતે ।
અનાવર્તનશાસ્ત્રં તુ કર્માવર્તનિષેધકૃત્ ॥ ૮.૨૩॥

નિત્યાસઙ્કુચિતજ્ઞાના નિત્યં ભગવદાજ્ઞયા ।
તત્કૈઙ્કર્યરતા નિત્યા અનન્તગરુડાદયઃ ॥ ૮.૨૪॥

એતેષામવતારાદિરિચ્છયૈવ હરેરિવ ।
આધિકારિકતામીષામીશ્વરેણ નિરૂપિતા ॥ ૮.૨૫॥

॥ ઇતિ વેદાન્તકારિકાવલ્યાં જીવનિરૂપણં નામાષ્ટમં પ્રકરણમ્ ॥

---

અથેશ્વરનિરૂપણં નામ નવમં પ્રકરણમ્ ।

સ્વેતરાખિલશેષિત્વમીશ્વરસ્ય તુ લક્ષણમ્ ।
સ સૂક્ષ્મચિદચિન્મિશ્રો વિશ્વોપાદાનકારણમ્ ॥ ૯.૧॥

સઙ્કલ્પયુક્ત એવૈષ નિમિત્તં કારણં મતમ્ ।
કાલાદ્યન્તર્યામિતયા સહકારિ ચ કારણમ્ ॥ ૯.૨॥

કાર્યરૂપેણ વૈવિધ્યયોગ્યુપાદાનમુચ્યતે ।
પરિણામયિતૃત્વેન નિમિત્તમપિ તન્મતમ્ ॥ ૯.૩॥

કાર્યોત્પત્ત્યુપકારેણ સહકારિ ચ તદ્ભવેત્ ।

એકવિજ્ઞાનસહિતસર્વવિજ્ઞાનવાદતઃ ॥ ૯.૪॥

ઉપાદાનત્વમેવોક્તં મૃદાદાવિવ ચેશ્વરે ।
તદૈક્ષતેતિ સઙ્કલ્પાન્નિમિત્તત્વં કુલાલવત્ ॥ ૯.૫॥

સહકારિત્વમપ્યસ્યાન્તર્યામિબ્રાહ્મણોદિતમ્ ।
સદ્બ્રહ્માત્માદયઃ શબ્દાઃ કારણત્વાવબોધિનઃ ॥ ૯.૬॥

તત્ર ચ્છાગપશુન્યાયાન્નારાયણપરા મતાઃ ।
નામરૂપવિભાગાનર્હત્વાવસ્થાસમન્વિતમ્ ॥ ૯.૭॥

સુસૂક્ષ્મચિદચિદ્યુક્તમેકં બ્રહ્માત્મકં મતમ્ ।
નામરૂપવિભાગાત્પ્રાઙ્ ન હિ ભેદોઽવસીયતે ॥ ૯.૮॥

મૃદ્ઘટાદાવપિ તતસ્તદેકમિતિ ગીયતે ।
નામરૂપાદ્યભાવેન સચ્છબ્દેનાપિ ગીયતે ॥ ૯.૯॥

તદેવાન્તઃપ્રવેશેન નામરૂપવિભાગકૃત્ ।
યથા જીવોઽન્તરાવિષ્ટો નામરૂપવિભાગભાક્ ॥ ૯.૧૦॥

દેવોઽહમિતિ શબ્દૈશ્ચ મુખ્યવૃત્ત્યાભિધીયતે ।
યથા નીલાદયઃ શબ્દા નીલાદ્યવ્યભિચારિણમ્ ॥ ૯.૧૧॥

વિશિષ્ટમેવ મુખ્યાર્થં વદન્તિ નિરુપાધિકમ્ ।
તથૈવ ભગવાનન્તર્યામી સન્નામરૂપયોઃ ॥ ૯.૧૨॥

વિભાગકૃત્સ તૈઃ શબ્દૈર્મુખ્યવૃત્ત્યાભિધીયતે ।
અમુખ્યાર્થત્વમેતેષાં પરૈરુક્તં ન યુક્તિમત્ ॥ ૯.૧૩॥

શરીરાદ્યપૃથગ્ભાવાચ્છબ્દા નિષ્કર્ષકેતરે ।
વિશિષ્ટમેવ શ્રીમન્તમભિધાસ્યન્તિ તત્ત્વતઃ ॥ ૯.૧૪॥

સર્વં બ્રહ્મેત્યૈતદાત્મ્યમિત્યાદિવ્યપદિષ્ટયઃ ।
સામાનાધિકરણ્યેન સંયુજ્યન્તેઽત એવ હિ ॥ ૯.૧૫॥

સ્વરૂપભિદયા ભેદશ્રુતયોઽસ્મન્મતે સ્થિતાઃ ।
વિશિષ્ટાભેદતોઽભેદશ્રુતયોઽપિ સુનિર્વહાઃ ॥ ૯.૧૬॥

કારણાત્સૂક્ષ્મચિદચિદ્યુક્તાત્સ્થૂલૈતદાહિતમ્ ।
કાર્યં નાન્યદિતિ વ્યક્તમારમ્ભણનયાદિષુ ॥ ૯.૧૭॥

નિર્ગુણત્વપરાઃ કાશ્ચિચ્છ્રુતયઃ સન્તિ તા ઇમાઃ ।
તદ્ધેયગુણરાહિત્યં બોધયન્તિ તતો ધ્રુવમ્ ॥ ૯.૧૮॥

॥ ઇતિ વેદાન્તકારિકાવલ્યામીશ્વરનિરૂપણં નામ નવમં પ્રકરણમ્ ॥

---

અથાદ્રવ્યનિરૂપણં નામ દશમં પ્રકરણમ્ ।

દ્રવ્યમેવં નિરૂપ્યાથ તદદ્રવ્યં નિરૂપ્યતે ।
શુદ્ધસત્ત્વં મિશ્રસત્ત્વમિતિ સત્ત્વં દ્વિધા મતમ્ ॥ ૧૦.૧॥

રજસ્તમોભ્યામસ્પૃષ્ટમદ્રવ્યં પૂર્વમુચ્યતે ।
રજસ્તમોવિમિશ્રં તુ મિશ્રસત્ત્વં પ્રકીર્તિતમ્ ॥ ૧૦.૨॥

અતીન્દ્રિયં પ્રકાશાદિનિદાનં સત્ત્વશબ્દિતમ્ ।
રજો લોભપ્રવૃત્ત્યાદિનિદાનં કીર્ત્યતે તમઃ ॥ ૧૦.૩॥

પ્રમાદમોહાદિહેતુસ્ત્રૈગુણ્યસ્ય નિરૂપણમ્ ।
લયે સમાનિ ચૈતાનિ વિષમાણ્યુદયાદિષુ ॥ ૧૦.૪॥

શ્રોત્રગ્રાહ્યો ગુણઃ શબ્દો વર્ણાવર્ણાત્મના દ્વિધા ।
તાલુભેર્યાદિજત્વેન ભૂતપઞ્ચકવર્ત્યસૌ ॥ ૧૦.૫॥

સ્પર્શસ્ત્વગિન્દ્રિયગ્રાહ્યઃ પૃથિવ્યાદિચતુષ્ટયે ।
શીતોષ્ણાદિપ્રભેદસ્તુ શાસ્ત્રાન્તરનિરૂપિતઃ ॥ ૧૦.૬॥

ચક્ષુરિન્દ્રિયનિર્ગ્રાહ્યં રૂપમેતચ્ચતુર્વિધમ્ ।
શ્વેતરક્તે પીતકૃષ્ણે ઇતિ ભેદાદ્વિધાદિમમ્ ॥ ૧૦.૭॥

ભાસ્વરાભાસ્વરત્વાભ્યાં ભાસ્વરં તેજસિ સ્થિતમ્ ।
પૃથિવીજલયોશ્ચૈતદભાસ્વરમુદાહૃતમ્ ॥ ૧૦.૮॥

રસનેન્દ્રિયનિર્ગ્રાહ્યો રસઃ ષોઢા સ કીર્તિતઃ ।
ઘ્રાણગ્રાહ્યો ગુણો ગન્ધો દ્વિધા શાસ્ત્રાન્તરેષ્વિવ ॥ ૧૦.૯॥

પૃથિવ્યામેવ ગન્ધઃ સ્યાત્પૃથિવીજલયો રસઃ ।
પૃથિવીજલતેજઃસુ રૂપં સ્પર્શઃ સવાયુષુ ॥ ૧૦.૧૦॥

શબ્દઃ પઞ્ચસુ ભૂતેષુ પ્રાધાન્યેનૈવમુચ્યતે ।
પઞ્ચીકરણરીત્યા તુ સર્વે સર્વત્ર સઙ્ગતાઃ ॥ ૧૦.૧૧॥

સંયુક્તપ્રત્યયે હેતુઃ સંયોગ ઇતિ કથ્યતે ।
કાર્યાકાર્યપ્રભેદેન સ સંયોગો દ્વિધા મતઃ ॥ ૧૦.૧૨॥

મેષહસ્તાદિસંયોગઃ કાર્યોઽકાર્યો વિભોર્વિભોઃ ।
વિભુદ્વયસ્ય સંયોગઃ શ્રુત્યા યુક્ત્યા ચ મન્યતે ॥ ૧૦.૧૩॥

તસ્માત્કાલસ્યેશ્વરેણ સંયોગોઽપિ સુસમ્મતઃ ।
સંયોગાભાવરૂપો હિ વિભાગો ન ગુણાન્તરમ્ ॥ ૧૦.૧૪॥

સર્વહેતુષુ હેતુત્વનિર્વોઢ્રી શક્તિરિષ્યતે ।
મણિમન્ત્રાદિકેષ્વેષા પ્રસિદ્ધા સા ત્વતીન્દ્રિયા ॥ ૧૦.૧૫॥

બુદ્ધ્યાદયોઽષ્ટૌ વિજ્ઞાને ભાવના ચાન્તરાવિશન્ ।
દ્રવત્વસ્નેહસઙ્ખ્યાનપરિમાણાનિ વેગકઃ ॥ ૧૦.૧૬॥

દ્રવ્યસ્વરૂપરૂપત્વાન્નાધિક્યં યાન્તિ કેવલમ્ ।
સ્થિતસ્થાપકમેતસ્મિન્ સંયોગેઽન્તર્ભવત્યતઃ ॥ ૧૦.૧૭॥

સંયોગાભાવરૂપત્વાત્પૃથક્ત્વસ્ય વિભાગવત્ ।
ગુરુત્વસ્યાપિ શક્તિત્વાન્નાધિક્યં ક્વાપિ વિદ્યતે ॥ ૧૦.૧૮॥

કર્મણામપિ શક્તિત્વં કેચિદાહુર્મનીષિણઃ ।
પદાર્થાન્તરતામન્યે પ્રાહુર્વેદાન્તવેદિનઃ ॥ ૧૦.૧૯॥

પ્રાચીનગ્રન્થપદવીમનુસૃત્ય યથામતિ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તકુક્ષિકેત્થં નિદર્શિતા ॥ ૧૦.૨૦॥

અણ્ણયાર્યાધ્વરીન્દ્રસ્ય તાર્તીયીકતનૂભુવા ।
શ્રીમદ્વેઙ્કટદાસેન નિર્મિતા કારિકાવલી ॥ ૧૦.૨૧॥

નિરમાયિ રમાયત્તપરમાદ્ભુતતેજસઃ ।
મુદમાધાતુકામેન મયેયં કારિકાવલી ॥ ૧૦.૨૨॥

ભક્તિપ્રપત્ત્યોરધિદેવતાભ્યા-
મિવાબ્જનાભસ્ય પદામ્બુજાભ્યામ્ ।
સમર્પયેઽસ્મન્મતકારિકાવલીં
તદઙ્ગુલીસઙ્ખ્યનિરૂપણાઢ્યામ્ ॥ ૧૦.૨૩॥

યઃ શ્રીમચ્છઠમર્ષણાન્વયપયઃ સિન્ધોઃ સુધાંશુર્મહા-
નણ્ણાર્યઃ સમભૂદ્વિભૂષિતચતુસ્તન્ત્રો વચઃકાન્તિભિઃ ।

તસ્યાસૌ તનયઃ સમાર્જિતનયઃ શ્રીવેઙ્કટાર્યઃ સુધીઃ
શ્રુત્યન્તાન્વયકારિકાલિમકરોત્પ્રીત્યૈ મહત્યૈ સતામ્ ॥ ૧૦.૨૪॥

॥ ઇતિ વેદાન્તકારિકાવલ્યામદ્રવ્યનિરૂપણં નામ દશમં પ્રકરણમ્ ॥

(પ્રમેયનિરૂપણં સમાપ્તમ્)
॥ ઇતિ શ્રીબુચ્ચિવેઙ્કટાચાર્યકૃતા વેદાન્તકારિકાવલી સમાપ્તા ॥

This is considered a primer on Ramanuja's Vedantic Philosophy.

Encoded and proofread by Ankur Nagpal ankurnagpal108 at gmail.com

---

*Vedantakarikavali by Shri Buchchivenkatacharya*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*